# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा - शास्त्रितृतीयवर्षम् (SEM-5) | प्रश्नपत्रम् – ७ | |
| विषय: - नव्यन्याय: | (C.E.-3.5.9.) | गुणा: - ७० |
| दिनाङ्क: - ११/१२/२०१८ | सन्दर्भग्रन्थ:- सिद्धान्तलक्षणम् | समय: -१०.०० त: ०१.०० |

### प्रथमान्विति:

**प्रश्न: १ निम्नलिखितेषु द्वौ समाधेयौ ।** **( १० )**

(१) अव्याप्यवृत्तिसाध्यकसदनुमानस्थले अव्याप्तिमाशङ्क्य परिहरत ।

(२) प्रतियोगितावच्छेदकाविषयकप्रतीतिविषयत्वस्य सार्थक्यं प्रतिपादयत ।

(३) सार्वभौममतमाधृत्य सामान्याभावं स्पष्टयत ।

**प्रश्न: २ एक: समाधेय: ।** **( १० )**

(१) वह्निमान् धूमात्-इत्यत्र दीधितिकृतसिद्धान्तलक्षणं विशदयत ।

(२) रूपत्वव्याप्यजातिमद्वान् पृथिवीत्वात् इत्यत्र परम्परासम्बन्धेन अव्याप्ति: निराक्रियताम् ।

### द्वितीयान्विति:

**प्रश्न: ३ निम्नलिखितेषु द्वौ समाधेयौ ।** **( १० )**

(१) सदनुमाने हेतुतावच्छेदकधर्मस्य सार्थक्यं स्पष्टयत ।

(२) वृक्ष: संयोगसामान्यभाववान् संयोगीययावद्विशेषाभाववत्वात् - इत्यत्र हेत्वसिद्धिदोषं प्रतिपादयत ।

(३) सोदाहरणं कार्यकारणभावं प्रतिपादयत ।

**प्रश्न: ४ एक: समाधेय: ।** **( १० )**

(१) मणिकारानुगुणं सामान्यमुखव्याप्त्या विशेषासिद्धि: कथमुत्पद्यते ? सोदाहरणं प्रतिपादयत ।

(२) प्रतियोगिमतोरपि देशकालयोर्देशकालावच्छेदेन तदभाव: । दीधितिवचनं व्याख्यात ।

## तृतीयान्वितिः

**प्रश्नः ५ निम्नलिखितेषु द्वौ समाधेयौ । (१०)**

(१) व्याप्यवृत्तिसाध्यकस्थले प्रतियोग्यसामानाधिकरण्यस्य सार्थक्यं प्रतिपादयत ।

(२) भूतत्वमूर्तत्वोभयवान् मूर्तत्वात् इत्यत्र अतिव्याप्तिमाशङ्क्य परिहरत ।

(३) दैशिकविशेषणतासम्बन्धं परिचाययत ।

**प्रश्नः ६ एकः समाधेयः । (१०)**

(१) यथाग्रन्थं साध्यतावच्छेदकोपलक्षितवैशिष्ट्यावगाहिनी अनुमितिः विशदयत ।

(२) नोपादेयं च सर्वथैव व्याप्यवृत्तिसाध्यके तत् साध्यादिभेदात् व्याप्तेर्भेदात् । इतीमां दीधितिं व्याख्यात ।

## चतुर्थान्वितिः

**प्रश्नः ७ निम्नलिखितप्रश्नेषु दश समाधेयाः । (१०)**

(१) शुद्धसत्ताधिकरणं किम् ?

(२) किन्नाम पक्षधर्मताज्ञानम् ?

(३) हेत्वाभाससामान्यलक्षणं लिखत ।

(४) दण्डिमान् दण्डिसंयोगात्- इत्यत्र अव्याप्तिः कस्मान्नास्ति ?

(५) असद्धेतुस्थलमेकमुदाहरत ।

(६) किं नाम लक्षणम् ?

(७) अन्योन्याभावस्य लक्षणं लिखत ।

(८) रूपत्वव्याप्यजातिमद्वान् पृथिवीत्वात् . . . इत्यत्र साध्यः कः ?

(९) नानाव्यक्तिसाध्यकसदनुमानं लिखत ।

(१०) सत्ताधिकरणं किम् ?

(११) किन्नाम व्याप्यत्वम् ?

(१२) परामर्शस्याकारो लेख्यः ।

(१३) गुणकर्मण्यत्वे सति सत्वादित्यत्र पक्षः कः ?

(१४) किन्नाम प्रतिबन्धकम् ?

(१५) मणिकारः कः ?

--oo--

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| कक्षा - शास्त्रितृतीयवर्षम् (SEM-5) | **प्रश्नपत्रम् – ७** | |
|---|---|---|
| **विषयः - नव्य न्यायः** | (C.E.-3.5.9.) | **गुणाः - ७०** |
| **दिनाङ्कः - ११/१२/२०१८** | सन्दर्भग्रन्थः- सिद्धान्तलक्षणम् | **समयः -१०.०० तः ०१.००** |

**उत्तराणि**

(१) शुद्धसत्ताधिकरणं द्रव्यं, गुणः, कर्म।

(२) व्याप्यस्य पक्षवृत्तित्वज्ञानम्।

(३) यद्विषयकत्वेन ज्ञानस्य अनुमितिविरोधित्वं तत्वम्।

(४) दण्डिमान् दण्डिसंयोगात् - इत्यत्र परम्परासम्बद्धदण्डत्वादिकमेव साध्यतावच्छेदकत्वान्।

(५) पर्वतो धूमवान् वह्नेः।

(६) असाधारणधर्मो लक्षणम्।

(७) तादात्म्यसम्बन्धावच्छिप्रतियोगिताकाभावः।

(८) रूपत्वव्याप्यजातिमद्वान् पृथिवीत्वान्. . इत्यत्र साध्यः रूपत्वव्याप्यजातिमत्वम्।

(९) पर्वतो वह्निमान् धूमात्।

(१०) द्रव्यगुणकर्माणि।

(११) न्यूनदेशवृत्तित्वम्। तदधिकराणात्यन्ताभावाप्रतियोगितानवच्छेदकत्वम्।

(१२) साध्यव्याप्यहेतुमान् पक्षः, वह्निव्याप्यधूमवान् पक्षः।

(१३) इदं द्रव्यम्।

(१४) कारणीभूताभावप्रतियोगित्वम्।

(१५) मणिकारः गङ्गेशोपाध्यायः।

--००--